National Journal of Hindi & Sanskrit Research

**ISSN: 2454-9177**
NJHSR 2019; 1(22): 06-07
© 2019 NJHSR
www.sanskritarticle.com

**भगतरामः**
शोधच्छात्रः,व्याकरणविभागः,
श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृत-
विद्यापीठम्, नवदेहली - 110016

**Correspondence:**
**भगतरामः**
शोधच्छात्रः,व्याकरणविभागः,
श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृत-
विद्यापीठम्, नवदेहली - 110016

# निपातार्थनिर्णयः

**भगतरामः**

निपातनिर्णयविषये पक्षत्रयं दृश्यते। निपतार्थानां प्रकर्षादीनां धातुमात्रतो बोधोभावेनोपसर्ग- सम्बन्धाद्बोधो भवति । अत एवोपसर्गाणां विशेषार्थद्योतकत्वमेव, यथा 'अनुभवति' इत्यत्रानुभवरूपार्थस्य अनुशब्दो द्योतक इति प्रथमपक्षः ।

क्वचिच्चोपसर्गाणां वाचकत्वमिति, यथा प्रतिष्ठत इत्यादौ स्थाधातोर्गतिनिवृत्तिवाचकत्वम्, प्रशब्देन तु गतिवाचकत्वं व्यवस्थाप्यते । अत एव न केवलं द्योतका एवोपसर्गाः, यतो वाचका अपि दृश्यन्ते लोक इति द्वितीयपक्षः ।

धातूपसर्गाभ्यामेवार्थबोधो जायते, न केवलेन धातुना, नापि केवलेनोपसर्गेण, उपसर्गस्तु शक्तिमात्रङ्करोतीति हेतोरुपसर्गास्सहकारिणो भवन्तीति तृतीयपक्षः ।
उपर्युक्तत्रिपक्षेषु कः पक्षसमीचीन इति विचार उपसर्गाणां द्योतकत्वमिति प्रथमपक्षसमीचीनः प्रतिभाति । प्रतिष्ठ इत्यत्र धातुनामेकार्थत्वात् स्थाधातोरेव गतिरर्थः, प्रशब्दस्तु द्योतकः । तदुक्तं भर्तृहरिणा –

**"स्थादिभिः केवलैर्यच्च गमनादिर्न गम्यते ।**
**तत्रानुमानाद् द्विविधात् तद्धर्मा प्रादिरुच्यते ॥"**[1]

अस्यायम्भावोऽस्ति यत्तिष्ठतिर्गतिनिवृत्तिं प्रसिद्धयाभिदधाति । अतः केवलतेन गमनन्न प्रतिपाद्यते। अनेकार्थधातव इति कृत्वानुमानाद्गतिवाचकत्वमपि तस्य व्यवस्थाप्यते । **"परौ भुवोऽवज्ञाने"**[2] इति पाणिनिसूत्रेऽवज्ञानग्रहणं धातूनामनेकार्थत्वे प्रमाणम् । उपसर्गस्तु तद्द्योतक एव ।
एवञ्चादिनिपातेष्वपि पक्षत्रयञ्ज्ञातव्यम्, तदुक्तं हरिणा –

**"निपाता द्योतकाः केचित् पृथागर्थाभिधायिनः ।**
**आगमा इव कोऽपि स्युः सम्भूयार्थस्य वाचकाः ।।"**[3]

अत्रापि द्योतकपक्ष एव न्याय्यः, केवलचादीनामप्रयोगात्प्रत्ययवदित्यनुमानं फलति । तदुक्तं भर्तृहरिणा –

**"चादयो न प्रयुज्यते पदत्वे सति केवलाः ।**
**प्रत्ययो वचकत्वेऽपि केवलो न प्रयुज्यते ॥"**[4]

इत्थं प्रादीनाञ्चादीनाञ्च निपातानां द्योतकत्वमिति भर्तृहरेः हृदयम् ।
कौण्डभट्टमतम् - प्रादयो द्योतकाशचादयो वाचका इति नैयायिकमतमयुक्तम्, वैषम्ये बीजाभावादिति ध्वनयन्निपातद्योतकत्वप्रतिपादितं कौण्डभट्टेन । तदुक्तं भूषणसारे –

**"द्योतकाः प्रादयो येन निपाताश्चादयस्तथा ।**
**उपास्येते हरिहरौ लकारो दृश्यते यथा ॥"**[5]

अर्थादीश्वरमनुभवतीत्यादिधातूपसर्गविशिष्टानां प्रत्येकन्न धात्वर्थः, "भवति" इत्यत्राप्यनुभवार्थापत्तेः। अनूपसर्गस्याप्येतादृशोऽर्थो न भवति, प्रत्ययानां प्रकृत्यार्थन्वितस्वार्थबोधकत्वव्युत्पत्तेः।'अनुगच्छति' इत्यत्रा-प्यनुभवार्थबोधः स्यात् । गौरवाद्विशिष्टार्थोऽपि न । तथा च विद्यमानत्वादिवाचकधातोर्लक्षणा,उपसर्गस्तात्पर्यग्राहकस्त था च तात्पर्यग्राहकत्वमेव द्योतकत्वमिति । तच्च चादिष्वपि तुल्यम्। 'चैत्रमिव पश्यति' इत्यादौ सादृश्यविशिष्ट-चैत्रपदलक्ष्यम्, इव शब्दस्तात्पर्यग्राहकस्तथा च तात्पर्यग्राहकत्वमेव द्योतकत्वमिति। तच्च चादिष्वपि तुल्यम् । 'चैत्रमिव पश्यति' इत्यादौ सादृश्यविशिष्टचैत्रपदलक्ष्यम्। इवशब्दस्तात्पर्यग्राहकः ।

किञ्च प्रादीनां वाचकत्वे 'भूयान् प्रकर्षः' 'कीदृशो निश्चयः' इति वत् 'भूयान् प्र' 'कीदृशो न' इत्यापि स्यात् । एवञ्च 'शोभनः समुच्चयः द्रष्टव्यः' इति वत् 'शोभनश्च द्रष्टव्यः' इत्यस्यापत्तिः स्यात् । किञ्च निपातानां वाचकत्वे काव्यादावन्वयो न स्यात् ।

यथा –

**"शरैरुस्त्रैरिवोदीच्यानुद्धरिष्यिन् रसानिव ।**
**इत्यादावन्वयो न स्यात् सुपाञ्च श्रवणं ततः ॥"**[6]

अत्रोस्रसदृशैश्शरैरसदृशानुदीच्यानुद्धरिष्यनित्यर्थः । अयञ्चोस्रादिशब्दानां तत्सदृशपरत्वे इवशब्दस्य द्योतकत्वे सत्येव सङ्गच्छते। उस्रादिशब्दानामुस्रादिसदृशे लक्षणाऽ-स्वीकारे प्रत्ययानां प्रकृत्यार्थन्वितस्वार्थबोधकत्वव्युत्पत्ति-विरोधः स्यात्।

एवं रीत्या निपातद्योतकत्वं प्रतिपाद्यमन्वयव्यतिरेकाभ्या-न्निपातानां बोधकतारूपशक्तेरवाधाद्वाचकत्वमपि प्रतिपादितं कौण्डभट्टेन । तदुक्तं भूषणासारे –

**"निपातानां वाचकत्वमन्वयव्यतिरेकयोः ।**
**युक्तं वा न तु तदयुक्तं परेषां मतमेवा नः ॥"**[7]

कारिकयानया निपातवाचकत्वमपि समर्थितम् । सर्वनिपातवाचकत्वेऽर्थवत्सूत्रेणैव प्रातिपदिकसञ्ज्ञासिद्धा, निपातानां प्रतिपादकसञ्ज्ञाविधानाय क्रियमाणं **"निपातस्यानर्थकस्य प्रातिपदिकत्वम्"**[8] इति भाष्यवार्तिकं व्यर्थमिति कृत्वा केचिद् द्योतकाः, केचिद्वाचकनिपाताः स्वीकरणीयाः।

**नागेशमतम्** - अनुभूयते सुखम्, साक्षात्क्रियते गुरुरित्यात्रा-नुभवाद्यर्थो यदि धातोः स्वीक्रियते तदा भवतीत्यत्रा-प्यनुभवार्थबोधः स्यात् । अतो धातोरनुभवाद्यर्थो न मन्तव्यः । स चार्थो यद्युपसर्गस्य मन्यते तदा "प्रकृत्यर्थान्वितस्वार्थबोधकत्वम्" इति व्युत्पत्त्याख्यातार्थ उपसर्गान्वयो न स्यात् । यदुपसर्गविशिष्टधातोः स चार्थो मन्यते तदा विशिष्टानुपूर्व्याश्शक्ततावच्छेदकत्वे गौरवं स्यादित्येतत्सर्वं मनसि निधायोपसर्गाणां द्योतकत्वमेव स्वीकृतन्नागेशेन।[9]

निपातद्योतकत्वे सत्येव ज्ञायते घट इति वद्देवदत्तादिसमवेतविषयताश्रयसुखप्रकृतधात्वर्थफलाश्रय त्वात् कर्त्तुरिति कर्मसङ्ज्ञायां साक्षात्क्रियत इत्यत्र करोतेरुत्पादनार्थे प्रसिद्धावपि साक्षात्पदसामीप्येन प्रत्यक्षात्मकज्ञानार्थप्रतीत्या तज्जनिरूपधात्वर्थफलाश्रयतया गुरोस्तत्सूत्रेणैव कर्मसङ्ज्ञया च धातोः सकर्मकतया तत्र-तत्र कर्मणि क्तादयो भवन्ति ।

निपातवाचकत्वे 'साक्षात् क्रियते गुरुः ' इत्यादौ कर्मणि लकारो न सिद्ध्येत । सकर्मकधातोरेव कर्मणि लकारविधानात् ।

अत्र तु साक्षात्कारार्थे कृधातोः सकर्मकत्वाभावः । स्वार्थफलव्यधिकरणव्यापारवाचकत्वं सकर्मकत्वमिति लक्षणं साक्षात्कारार्थे नैव घटते। भूयो-भूयो निपातद्योतकपक्ष एव समर्थितो नागेशेन "निपातानामर्थवत्त्वमपिद्योत्यार्थमादायैव शक्तिलक्षणाद्यो-तकतान्यतमसम्बन्धेन बोधकत्वस्यैवार्थवत्वात् । नञ्समास उतारपदार्थप्राध्यान्यं द्योत्यार्थापेक्षयैवा ।

"प्रतिष्ठते" इत्यत्र तिष्ठतेरेव गतिवाची, धातूनामनेकार्थत्वात् । प्रशब्दस्तु तदर्थगत्यादित्वद्योतकः।

**सन्दर्भग्रन्थ सूची :-**

1. भर्तृहरिः, वाक्यपदीयम्, २.१८९
2. महर्षिपाणिनिः, अष्टाध्यायी, सूत्रम्, ३.३.५५
3. भर्तृहरिः, वाक्यपदीयम्, २.१९२
4. भर्तृहरिः, वाक्यपदीयम्, २.१.९४
5. कौण्डभट्टः, व्याकरणभूषणसारः, कारिका, ४२
6. कौण्डभट्टः, व्याकरणभूषणसारः, पृष्ठसङ्ख्या - ३७०
7. पतञ्जलिः, महाभाष्यम्, १.२.४५
8. कौण्डभट्टः, व्याकरणभूषणसारः, पृष्ठसङ्ख्या - ३७०
9. नागेशभट्टः, परमलघुमञ्जुषा, पृष्ठसङ्ख्या - ३७०